**अश्वस्तनिक** त्रि० श्वस्तनमस्त्यस्य मत्वर्थे ठन् न०त० । परदिनास्थायिधने वर्त्तमानदिनपर्य्याप्तधनसञ्चयकारिणि गृहस्थभेदे “कुसूलधान्यकोवा स्यात् कुम्भीधान्यक एव वा । त्र्यहैहिकोवापि भवेदश्वस्तनिक एव वा” मनुः ।

**अश्वस्तोमीय** न० अश्वस्य स्तोमं स्तुतिरस्त्यस्य मत्वर्थे छ । हयस्तुतियुक्ते सूक्तभेदे तच्च सूक्तम्” ऋ० १,१६२ । मानोमित इत्यादि द्वाविंशत्यृचम् । २ तत्साध्ये होमजाते च । “अश्वस्य वाऽआलब्धस्य मेध उदक्रामत्तदश्वस्तोमीय मभवद्यदश्वस्तोमीयं जुहोत्यश्वमेव मेधसा समर्धयति । आज्येन जुहोति । मेधोवा आज्यं मेधोऽश्वस्तोमीयं मेधमेवास्मिंस्तन्मेधो दधात्याज्येन जुहोत्येतद्वै देवानां प्रियं धाम यदाज्यं प्रियेणैवैनान्धाम्ना समर्धयति । अश्वस्तोमीयं हुत्वा द्विपदा जुहोति । अश्वोवाऽ अश्वस्तोमीयं पुरुषो द्विपदा, द्विपाद्वै पुरुषो द्विप्रतिष्ठस्तदेनं प्रतिष्ठया समर्धयति तदाहुः अश्वस्तोमीयं पूर्वं होतव्यां द्विपदा इति पशवो वा अश्वस्तोमीयं पुरुषो द्विपदा यदश्वस्तोमीयं हुत्वा द्विपदा जुहोति तस्मात् पुरुष उपरिष्टात् पशूनधितिष्ठति षोड़शाश्वस्तोमीया जुहोति” शत०ब्रा० ।

**अश्वस्थान** न० ६त० । वाजिशालायाम् “अश्वस्थानात् गजस्थानात् सङ्गमात् वल्मीकात् ह्रदात्” विष्णुध०पुरा० ।

**अश्वहनु** पु० अश्वस्य हनुरिव हनुरस्य । “दानवभेदे हरिश्चाश्वहनुश्चैव वीरौ तावथ सृञ्जिमौ” हरिवं० २६ अध्या० ।

**अश्वहन्तृ** पु० अश्वं हन्ति हन–तृच् ६त० । १करवीरे “वीजं विड़ङ्गाश्वहन्त्रोर्हरिद्रे बृहतीद्वयम्” सुश्रुतः । २हय नाशके त्रि० ।

**अश्वहय** पु० अश्वेन हिनोति गच्छति हि–कर्त्तरि अच् । अश्वेन गतिमति “प्रत्यद्भिर्यज्ञानामश्वहयो व रथानाम्” ऋ०१०,२६,५ । अश्वेन हीयते व्याप्यते कर्म्मणि अच् । अश्वव्याप्ये । “ऋजन्त्यश्वहयैरनिशितं नमोभिः ऋ०६,६६,,२ ।

**अश्वहृदय** न० अश्वस्य हृदयं मनोगतभावादि । हयाभिलाषे २तदावेदकविद्याभेदे च अश्वविच्छब्दे उदा० ।

**अश्वाक्ष** पु० अश्वस्याक्षीव अच् समा० । देवसर्षपवृक्षे ।

**अश्वादि** पु० पाणिन्युक्ते शुभाशुभसूचकनिमित्ते संयोगरूपेऽर्थे ठञ्प्रत्ययनिमित्ते १शब्दसमूहे सच गणः अश्व, अश्मन् गण, ऊर्णा उमा गङ्गा वर्षा वसु । गोत्रापत्ये २फञ्प्रत्ययनिमित्ते शब्दसमूहे च स च गणः अश्व, अश्मन् शङ्ख, शूद्रक, विद, पुट, रोहिण, खर्जूर, खञ्जार, वस्त, पिञ्जूल भड़िल, भण्डिल, भड़ित, भण्डित, प्रकृत, रामोद, क्षान्त, काश, तीक्ष्ण, गोलाङ्क अर्क, स्वर, स्फुट, चक्र, श्रविष्ट, पविन्द, पवित्र, गोमिन्, श्याम, धूम, धूम्र, वाग्मिन्, विश्वानर कुट, शप (आत्रेये) । जन, जड़, खड़, ग्रीष्म, अर्ह, कित, विशम्प, विशाल, गिरि, चपल, चुप, दासक, वैल्व प्राच्य, धर्म्म, आनडुह्य, (पुंसि)जात, अर्जुन, प्रहृत, सुमनस् दुर्मनस् मनस्, प्रान्त, ध्वन, आत्रेय (भरद्वाजे) भरद्वाज, (आत्रेये) उत्स, आतव, कितव, वद, धन्य, पाद, शिव, खदिर अश्वादि ।

**अश्वामघ** त्रि० अश्वोमघं धनमस्य वेदे दीर्घः । “अश्वरूपधन स्वामिनि ‘अश्वामघा गोमघा वा हुवेम” ऋ०७,०७१,१

**अश्वायुर्वेद** पु० अश्वस्यायुर्वेद्यतेऽनेन विद–णिच् घञ् । हयायुर्ज्ञापके शास्त्रे तच्च शालिहोत्रेण सुश्रुतनामानं स्वसुतं प्रत्युपदिष्टम् तन्मूलञ्च जयदत्तकृतञ्च अश्वशब्दे विवृतिः ।

**अश्वारि** पु० अश्वस्यारिः ६त० । महिषे ।

**अश्वारूढ़** पु० अश्वआरूढ़ोऽनेन । सादिनि अश्वारोहिणि ।

**अश्वारोह** पु०अश्वमारोहति आ+रुह–अण् उप०स । हयवाहके, हयारोहणेन २युद्धकर्त्तरि च । अश्वस्तन्मेढ्रमिवारोहोमूलमस्य । ३अश्वगन्धायां स्त्री ।

**अश्वावतान** पु० अश्वस्येवावतानोऽस्य । ऋषिभेदे । विदा० अपत्ये अञ् । आश्वावतानः तद्गोत्रापत्ये बहुषु गोपवना० न लुक् । आश्वावतानाः । [गन्धावृक्षे ॥

**अश्वावरोहक** पु० अश्वस्तन्मेढ्रमिवावरोहति ण्वुल् । अश्व-

**अश्विन्** पु० द्विव० अश्वाः सन्ति ययोः इनि, अश्विन्यां नक्षत्रे भवौ “सन्धिवेलाद्यृतुनक्षत्रेभ्यः पा० अण् “नक्षत्रेभ्योबहुलम्” पा० वा लुक् लुकि स्त्रीप्रत्ययस्य लुक्, अश्वा उत्पत्तिः स्थानत्वेनास्त्यस्य इनि वा । १स्वर्गवैद्ययोः । “किमश्विनौ सोमरसं पिपासू” भट्टिः “वासोदश्चन्द्रसालोक्यमश्विसालोक्यमश्वदः” मनुः । “त्वाष्ट्री तु सवितुर्भार्य्या बड़वारूपधारिणी । असूयत महाभागा सान्तरीक्षेऽश्विनावुभौ” भा०आ०प० । “या वां कशा मधुमत्यश्विना सूनृतावती” यजु० ७,२ । अश्वस्तच्चिह्नावर्त्तः अस्त्यर्थे इनि । “कपोलयोस्तथावर्त्तौ विद्येते वाजिनोर्यदि । तावाश्विनाविति प्रोक्तौ राज्यवृद्धिकरौ परौ” इत्युक्तलक्षणयोः २हययोश्च द्वि०व० । ३हययुक्ते त्रि० । स्त्रियां ङीप् । “गोमा अग्नेऽविमाँ अश्वी” ऋ०४,२,५ ।